# shrIbhuvaneshvarI pa nchakam or prAtaHsmaraNam

# શ્રીભુવનેશ્વરી પઞ્ચકં અથવા પ્રાતઃસ્મરણમ્

## Document Information

Text title : bhuvaneshvarIpanchakaM evaM prAtaHsmaraNam

File name : shrIbhuvaneshvarIpanchakam.itx

Category : panchaka, devii, dashamahAvidyA, dattAtreyAnandanAtha, devI

Location : doc_devii

Author : dattAtreyAnandanAtha

Transliterated by : Ravi Mukku ravi_mukku at hotmail.com

Proofread by : Ravi Mukku ravi_mukku at hotmail.com

Latest update : March 25, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

shrIbhuvaneshvarI pa nchakam or prAtaHsmaraNam

# શ્રીભુવનેશ્વરી પઞ્ચકં અથવા પ્રાતઃસ્મરણમ્

પ્રાતઃ સ્મરામિ ભુવના-સુવિશાલભાલં
માણિક્ય-મૌલિ-લસિતં સુસુધાંશુ-ખણ્ડમ્ ।
મન્દસ્મિતં સુમધુરં કરુણાકટાક્ષં
તામ્બૂલપૂરિતમુખં શ્રુતિ-કુન્દલે ચ ॥ ૧॥

પ્રાતઃ સ્મરામિ ભુવના-ગલશોભિ માલાં
વક્ષઃશ્રિયં લલિતતુઙ્ગ-પયોધરાલીમ્ ।
સંવિત્ ઘટઞ્ચ દધતીં કમલં કરાભ્યાં
કઞ્જાસનાં ભગવતીં ભુવનેશ્વરીં તામ્ ॥ ૨॥

પ્રાતઃ સ્મરામિ ભુવના-પદપારિજાતં
રત્નૌઘનિર્મિત-ઘટે ઘટિતાસ્પદઞ્ચ ।
યોગઞ્ચ ભોગમમિતં નિજસેવકેભ્યો
વાઞ્છાઽધિકં કિલદદાનમનન્તપારમ્ ॥ ૩॥

પ્રાતઃ સ્તુવે ભુવનપાલનકેલિલોલાં
બ્રહ્મેન્દ્રદેવગણ-વન્દિત-પાદપીઠમ્ ।
બાલાર્કબિમ્બસમ-શોણિત-શોભિતાઙ્ગીં
વિન્દ્વાત્મિકાં કલિતકામકલાવિલાસામ્ ॥ ૪॥

પ્રાતર્ભજામિ ભુવને તવ નામ રૂપં
ભક્તાર્તિનાશનપરં પરમામૃતઞ્ચ ।
હ્રીઙ્કારમન્ત્ર-મનની જનની ભવાની
ભદ્રા વિભા ભયહરી ભુવનેશ્વરીતિ ॥ ૫॥

યઃ શ્લોકપઞ્ચકમિદં સ્મરતિ પ્રભાતે
ભૂતિપ્રદં ભયહરં ભુવનામ્બિકાયાઃ ।
તસ્મૈ દદાતિ ભુવના સુતરાં પ્રસન્ના
સિદ્ધં મનોઃ સ્વપદપદ્મ-સમાશ્રયઞ્ચ ॥

ઇતિ શ્રીદત્તાત્રેયાનન્દનાથ-વિરચિતં શ્રીભુવનેશ્વરી-પઞ્ચકમ્
એવમ્ શ્રીભુવનેશ્વરી પ્રાતઃસ્મરણં સમ્પૂર્ણમ્ ।

Encoded and proofread by Ravi Mukku ravi_mukku at hotmail.com

---

*shrIbhuvaneshvarI pa nchakam or prAtaHsmaraNam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*